# Shri Virabhadra Ashtakam

# શ્રીવીરભદ્રાષ્ટકમ્

## Document Information

Text title : Shri Virabhadra Ashtakam 02 19

File name : vIrabhadrAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-19

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

Shri Virabhadra Ashtakam

# શ્રીવીરભદ્રાષ્ટકમ્

દક્ષાધ્વરધ્વંસવિધાનદક્ષં
    દમ્ભોલિતુલ્યાયતબાહુવૃન્દમ્ ।
ફાલોજ્જ્વલન્નેત્રહુતાશનેન
    ભસ્મીકૃતારિં ભજ વીરભદ્રમ્ ॥ ૧॥

કઙ્કાલદણ્ડં કઠિનોગ્રદંષ્ટ્રં
    કપાલમાલં(લા)કમનીયહારમ્ ।
કન્દર્પદર્પાપહસર્પહારં
    ભસ્માઙ્ગલેપં ભજ વીરભદ્રમ્ ॥ ૨॥

ભૂતેશમીશં ભુજગાભિરામં
    ભસ્મીકૃતાશેષપુરપ્રતાપમ્ ।
ઉન્નિદ્રપદ્માયતનેત્રપદ્મં
    શ્રીવીરભદ્રં ભજ વીરભદ્રમ્ ॥ ૩॥

કાલાઞ્જનશ્યામલકોમલાઙ્ગં
    કણ્ઠાન્તરસ્થાપિતકાલકૂટમ્ ।
ભાગીરથીચુમ્બિતમૌલિભાગં
    ફાલાગ્નિનેત્રં ભજ વીરભદ્રમ્ ॥ ૪॥

નિશાટકોટીપટુસેવ્યમાનં
    નીલાઞ્જનાભં નિહતારિલોકમ્ ।
પાટીરવાટં વટમૂલવાસં
    ભદ્રાક્ષમાલં ભજ વીરભદ્રમ્ ॥ ૫॥

જગત્પ્રવીરં જગતામધીશં
    બાલેન્દુજૂટં ફણિરાજભૂષમ્ ।
સહસ્રબાહું સનકાદિવન્દ્યં
    ચક્રાભિરામં ભજ વીરભદ્રમ્ ॥ ૬॥

મઞ્જીરપુઞ્જારવમઞ્જુપાદં
    કુઞ્જામરામ્ભોજમણીન્દ્રહારમ્ । (?)
કઞ્જાતસઞ્જાતવિરાજમાનં
    વિકાસિનેત્રં ભજ વીરભદ્રં (?) ॥ ૭॥

કાલસ્ય કાલં કનકાદ્રિચાપં
    વીરેશ્વરં નિર્વિષયાન્તરઙ્ગમ્ ।
નિરીહમેકં નિગમાન્તમૃગ્યં
    નિર્વાણહેતું ભજ વીરભદ્રમ્ ॥ ૮॥

ભદ્રાષ્ટકં (પાપહરં) પઠેદ્યઃ
    પ્રભાતકાલે પિતૃસૂતિકાલે ।
સુખી ભવેત્સમ્પદવાન્ સુભોગી
    સુરૂપવાન્ સુસ્થિરબુદ્ધિતસ્ય (બુદ્ધિયુક્તઃ) (?) ॥ ૯॥

॥ ઇતિ શ્રીવીરભદ્રાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Virabhadra Ashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*